PAPER - 5

# MT

2017 .... .... 1200

Seat No. | | | | | | | |

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - II**
**PAPER - V**

**Time : 2 Hours** **(Pages 6)** **Marks : 40**

## प्रथमः विभागः - गद्यम् ।

**प्र.१ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि द्वे कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

नागार्जुनः ........सहायकत्वेन स्वीकृतवान् यतः ........ ।

(प्रथमयुवकं / द्वितीययुवकं) (तेन आज्ञापालनं कृतम् । / तेन रुग्णसेवा कृता ।)

(ii) कः कं वदति ? १

किं त्वया न आनीतं रसायनम् ?

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

यः रुग्णसेवां कृतवान् सः किमपि न अवदत् ।

अथ अपरेद्युः उभौ तौ नागार्जुनं प्रति आगतवन्तौ । तदा तयोरेकः उक्तवान्, महाशय, अहंरसायनं कृत्वा आनीतवान् । पश्यतु भवानिति । द्वितीयं शान्तचेतसं दृष्ट्वा नागार्जुनेन पृष्टं, कथमिदानीम् अभाषमाणः तिष्ठसि? किं त्वया नानीतं रसायनम् ? तदाकर्ण्य स मन्दस्वरेण अगदत्, आचार्य, ह्यः गच्छन्तौ पथि आवामेकं रुग्णमपश्याव । तस्यावस्थां वीक्ष्य तं झटिति रुग्णालयं नेयमिति मत्वा अहं तं नीतवान् । तस्य समीपे स्थित्वा सेवां कृतवान्। अतः समयाभावाद् रसायनं निर्मातुं नाशक्नवमिति । तस्य सेवाभावं ज्ञात्वा नागार्जुनस्तमेव द्वितीयं युवकं सहायकत्वेन स्वीकृतवान् । येन रसायनं न आनीतमपि तस्मै किमर्थं सहायकपदं दत्तम् ? इति राज्ञा पृष्टे नागार्जुनोऽभणत्, एतेन रोगिणः सेवा कृता, मानवता दर्शिता । सेवाभावेन विना कथं चिकित्सको भवेत्? अतः अस्यैव नियुक्तिः मया कृता । सेवाभावः परमगहनोऽतः स एव परीक्षणीयः इति यत् कथ्यते तद्यथार्थमेव ।

**२. स्वमतप्रकटनम् ।**

'रुग्णसेवा इति ईश्वरसेवा' - माध्यमभाषया स्पष्टीकुरुत । २

**प्र.१ ब) गद्यांशं पठित्वा निर्दिष्टाः कृती कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

........ क्रीडायां द्वादश क्रीडापटवः भवन्ति । क्रीडासाधनस्य ........ एतस्याः क्रीडायाः वैशिष्ट्यम् । (खो - खो / कबड्डी) (आवश्यकता / अनावश्यकता)

(ii) पूर्णवाक्येन उत्तरं लिखत । १
क्रीडकस्य व्यक्तित्वं कैः गुणैः विकसन्ति ?

(iii) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १
कबड्डीक्रीडा केवलं महिलानां कृते प्रचलितः अस्ति ।

> अस्यां क्रीडायां प्रतिसङ्घं द्वादश क्रीडापटवः भवन्ति । क्रीडाङ्गणे तु सप्त क्रीडापटव एव खेलन्ति । पञ्च क्रीडापटवो बहिस्तिष्ठन्ति । एष क्रीडाप्रकारो न केवलं पुरुषाणाम्, अपि तु महिलानां कृतेऽपि प्रचलितोऽस्ति । अनया कबड्डी-क्रीडया शरीरचापल्यम्, उत्साहः, आक्रमकत्वं, स्वसंरक्षणवृत्तिः, शरीरसौष्ठवं च लभते । साहसं, निरीक्षणशक्तिः, योजकत्वं, निर्णयक्षमता, साङ्घिकी भावना, एकात्मता, देशाभिमानश्चैतैः नैकैर्गुणैः क्रीडकस्य व्यक्तित्वं विकसति । एतस्यै क्रीडायै कस्यापि क्रीडासाधनस्यावश्यकता नास्तीति महत्त्वपूर्णं वैशिष्ट्यमिति । स्वातन्त्र्यपूर्वकालादेव क्रीडामेतां वैश्विकस्तरं नेतुं प्रथमप्रयासः कृतः महाराष्ट्रेणैव । शून्यपञ्चनवैकतमे - (१९५०) खिस्ताब्दे अखिल-भारतीय-कबड्डी-सङ्घटनायाः स्थापना समजायत । भारतीय ऑलिम्पिक-क्रीडासमित्या अष्टपञ्चनवैक (१९५८) तमे खिस्तवर्षे एषः क्रीडाप्रकारः ऑलिम्पिक वैश्विक - क्रीडास्पर्धासु निवेशितः । शून्यनवनवैक (१९९०) तमे संवत्सरे बीजिङ्गनगरे आयोजितायाम् ऑलिम्पिक-स्पर्धायां चीनदेशेनापि एषा क्रीडा स्वीकृता । तदनन्तरं कबड्डीक्रीडायाः सुवर्णयुगमेवावतरितम् ।

२. **पृथक्करणम् ।** २

कबड्डीक्रीडया लभते

| | | | | |
|---|---|---|---|---|
| | उत्साहः | | | |

प्र.१ **क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

१. **शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।)**

(i) समूहेतरपदं लिखत । १

१) त्रुटितः, निर्मितः, खण्डितः ।

२) सत्यम्, अनृतम्, ऋतम् ।

(ii) विशेषण - विशेष्य - अन्वितिः । (मञ्जूषातः उचितपदैः स्तम्भपूरणं कुरुत) १

| ग्राहकः | ग्राहकमञ्चः |
|---|---|
| | |

(बद्धपरिकरः, वञ्चितः, निर्मितः, सन्तुष्टः)

(iii) गद्यांशे आगते द्वे धातुसाधित-अव्यये चित्वा लिखत । १

| | | |
|---|---|---|
| मधुरा | - | अम्ब, नैष सम्यक् तोलयति । तोलनार्थं सम्यक् परिमाणमपि न योजयति। परिमाणस्थाने पाषाणखण्डं योजयति । |
| माता | - | मधुरे, सत्यं वदसि । नावलोकितं मया । किं रे, तव समीपे ISI चिह्नाङ्कितानि परिमाणानि न सन्ति ? परिमाणानां स्थाने पाषाणखण्डानामुपयोजनं न विधियुक्तम्। तुलायाः दण्डोऽपि त्रुटितः । अतः वस्तूनां तोलनमपि सम्यग् न भवति । जानासि किम्? यदि ग्राहकमञ्चमभिगच्छामि तर्हि शाकविक्रय - अनुज्ञापत्रादपि त्वं वञ्चितो भवसि । |
| मधुरा | - | कः एष मञ्चः ? रङ्गमञ्चः श्रुतः मया, न तु ग्राहकमञ्चः । |
| माता | - | ग्राहकहिताय ग्राहकसुखाय च चतुःसप्तनवैकतमे (1974) संवत्सरे स्थापिता एषा संस्था । 'ग्राहकपञ्चायत' 'ग्राहकमञ्च' वा इति नाम्ना ज्ञायते । ग्राहकाणां ग्राहकैः ग्राहकार्थं निर्मितः एष मञ्चः ग्राहकहितायैव बद्धपरिकरो वर्तते । |
| द्वितीयः शाकविक्रेता | - | यदि ग्राहकः विक्रेयवस्तुविषये सन्तुष्टः न भवति तर्हि ग्राहकन्यायालयं गन्तुं तस्य अधिकारो भवति । अतः मम परिमाणानि गृहीत्वा शाकं सम्यक् तोलय। |

२. **पृथक्करणम् ।**

**क्रमसंयोजनं कुरुत ।** २

(i) ग्राहकमञ्चविषये मधुरा पृच्छति ।

(ii) द्वितीयविक्रेता परिमाणानि ददाति ।

(iii) त्रुटितदण्डं मधुरा पश्यति ।

(iv) माता ग्राहकाधिकारान् स्पष्टीकरोति ।

## द्वितीयः विभागः - पद्यम् ।

**प्र.२ अ) पद्यांशौ पठित्वा निर्दिष्टे कृती कुरुत ।**

शनैः शनैश्च भोक्तव्यं स्वयं वित्तमुपार्जितम् ।
रसायनमिव प्राज्ञैर्हेलया न कदाचन ।।१।।
माऽस्तु धनं मौक्तिकं काञ्चनम् अस्तु अविरतं तव प्रसादनम् ।
त्वत्स्पर्शाद् मे भवतु सुवर्णं गुरुचरणाभ्यां सदा वन्दनम् ।।२।।

१. **शब्दज्ञानम् ।**

भिन्नार्थकं शब्दं चिनुत । १

१) शनैः शनैः, शीघ्रम्, झटिति ।

२) प्रसादनम्, कृपा, मार्गदर्शनम् ।

२. **पृथक्करणम् ।** २




**प्र.२ ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

समूलशाखान् पश्यामि निहतान् कायिनो द्रुमान् ।
युष्माभिरिह पूर्णाभिर्नद्यस्तत्र न वेतसम् ॥१॥
अकायश्चाल्पसारश्च वेतसः कूलजश्च वः ।
अवज्ञया वा नानीतः किं च वा तेन वः कृतम् ॥२॥
तिष्ठन्त्येते यथास्थानं नगा ह्येकनिकेतनाः ।
ते त्यजन्ति ततः स्थानं प्रातिलोम्यान्न वेतसः ॥३॥

१. **अवबोधनम् ।**

पूर्णवाक्येन उत्तरत । १

वृक्षाः कस्मात् स्थानं त्यजन्ति ?

२. **स्पष्टीकरणम् ।** २

नम्रस्वभावः कथं हितकरः इति माध्यमभाषया लिखत ।

**प्र.२ क) स्मरणम् ।**

**श्लोकपूर्तिं कुरुत । (केवलं १ श्लोकः लेखनीयः ।)** २

(i) अतिथि० ....... स्वशक्तितः ॥

(ii) साम्नैव ....... पटोलेन ॥

**प्र.२ ड) श्लोकांशान् मेलयत ।** २

| | | |
|---|---|---|
| (i) | शस्त्रं निहन्ति पुरुषस्य | सुहता भवन्ति । |
| (ii) | अनिशं शिष्यहितस्य चिन्तनम् | यशश्च हन्ति । |
| (iii) | प्रज्ञाहताश्च नितरां | शरीरमेकम् |
| (iv) | प्रज्ञा कुलं च विभवं च | गुरुचरणाभ्यां सदा वन्दनम् । |

## तृतीयः विभागः - व्याकरणम् ।

**प्र.३ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)** २

**अ) नाम/सर्वनामपदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

| | चतुर्थी बहुवचनम् | सप्तमी द्विवचनम् | द्वितीया एकवचनम् |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(एतयोः, राजभ्यः, त्वाम्, नाम्नोः, अस्मभ्यम्, बुद्धिमन्तम्)

**आ) क्रियापदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| द्वितीयः भविष्यकालः | परोक्षः भूतकालः | वर्तमानकालः | प्रथमः भूतकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|
| | | | | | |

(जगाम, स्यात्, करिष्ये, अशक्नवम्, जानानि, भुञ्जे)

**इ) समासाः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

**विग्रहवाक्यानां समानामभिः सह मेलनं कुरुत ।**

| | विग्रहः | समासनाम |
|---|---|---|
| (i) | शान्तिः च सुखं च, तयोः । | उपपद तत्पुरुष समास |
| (ii) | न विद्यते असूया यस्य सः । | कर्मधारय समास |
| (iii) | समयं जानाति इति । | षष्ठी तत्पुरुष समास |
| (iv) | चन्द्रस्य ज्योत्स्ना । | अव्ययीभाव समास |
| (v) | रोम नाम नगरम् । | नञ् बहुव्रीहि समास |
| (vi) | समयम् अनतिक्रम्य । | इतरेतर द्वन्द्व समास |
| | | द्विगु समास |

**ई) उपपदविभक्तिः ।** २

**उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

(i) .......... परितः विविधाः वृक्षाः विलसन्ति । ( क्षेत्रे / क्षेत्रं / क्षेत्रस्य)

(ii) .......... विना कथं चिकित्सकः भवेत् ? ( सेवाभावम् / सेवाभावस्य / सेवाभावाय)

(iii) सः .......... न भीतः । (व्याघ्राय / व्याघ्रात् / व्याघ्रे)

(iv) नमः .......... । ( गङ्गाम् / गङ्गायै / गङ्गायाः)

(v) अलं .......... । ( प्रशंसा / प्रशंसया / प्रशंसाम् )

(vi) .......... कृते प्रयोगशाला अपि वर्तते । ( छात्रेभ्यः / छात्राणाम् / छात्रेषु)

**उ) सन्धिं / सन्धिविग्रहं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) दर्शयतीव = ......... + इव ।

(ii) ......... = जानासि + एव ।

(iii) सुमार्गमध्येऽस्ति = ......... + अस्ति ।

(iv) ......... = मूर्ध्नः + अस्य ।

(v) यदुक्तम् = ......... + ......... ।

(vi) तीक्ष्णस्तनुः = तीक्ष्णः + ......... ।

**ऊ) सङ्ख्यावाचकविशेषणानि - रिक्तस्थानपूर्तिः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) अस्मिन् मार्गे .......... वाहनानि सन्ति । (4)

(ii) ग्रीष्मः .......... ऋतुः । (2nd)

(iii) .......... स्त्रियः सन्ति । (3)

(iv) भाद्रपदमासस्य .......... तिथौ गणेशोत्सवः प्रारभते । (4th)

(v) दिनस्य .......... अहं दुग्धं पिबामि । (twice)

(vi) अस्मिन् वर्षे अहं .......... विदेशं गतः । (thrice)

## चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४ अधोनिर्दिष्टे कृती कुरुत ।**

**अ) वाक्यनिर्माणम् ।** ४

**कोष्ठकतः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत ।**

| | | |
|---|---|---|
| अहं | दानेन | तरन्ति |
| सागरे | आनन्देन | अस्मि |
| हस्तः | मत्स्याः | नृत्यन्ति |
| बालकाः | शिक्षिका | शोभते |

**आ) परिच्छेदपूर्तिः ।** ४

**मञ्जूषातः उचितान् शब्दान् चित्वा ४ रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत ।**

अधुना सर्वत्र सन्तगाडगेबाबा - नागरी स्वच्छताभियानस्य ........ भवति। एतद् अभियानं तु अतीव ........ । स्वच्छतायाः महत्त्वं तु सर्वे जानन्ति। किन्तु न केवलं स्वगृहस्य स्वच्छता अपि तु परिसरस्य स्वच्छतात्र अभिप्रेता। सुहृदः, अत्र एकत्रीभूय वयं सर्वे ........ अभियाने सहभागिनः भवेम तथा तस्य लाभार्थिनः अपि भवेम । एकस्मिन् दिने किमपि ........ न जायते। किन्तु सर्वत्र विविधैः अल्पसमूहैः अङ्गीकृतं स्वच्छताभियानं शनैः शनैः सफलीभवेत्।

(अस्मिन्, उपयुक्तम्, प्रसारः, परिवर्तनम्)

**Best of Luck**